वज्रकूटः शतशृङ्ग इन्द्रसेनो ज्योतिष्मान् सुवर्णो हिर-ण्यष्ठीवो मेघमाल इति सेतुशैलाः। अरुणा नृम्णाऽऽङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरेति महानद्यः। यासां जलोपस्पर्शनविधूतरजस्तमसो हंस-पतङ्गोर्ध्वायनसत्याङ्गसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसन्दर्शनप्रजननाः स्वर्गद्वारं त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्य्यमात्मानं यजन्ते" भाग० ५।२०। "क्षारोदेन यथा द्वीपो जम्बुसंज्ञोऽभिवेष्टितः। संवेष्ट्य-क्षारमुदधिं प्लक्षद्वीपस्तथा स्थितः। जम्बुद्वीपस्य विस्तारः शतसाहस्रसम्मितः। स एव द्विगुणो ब्रह्मन्! प्लक्षद्वीपो-ऽप्युदाहृतः। सप्त मेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य वै। ज्येष्ठः शान्तभयो नाम शैशिरस्तदनन्तरः। सुखोदय-स्तथानन्दः शिवः क्षेमक एव च। ध्रुवश्च सप्तमस्तेषां प्लक्षद्वीपेश्वरा इमे। पूर्वं शान्तभयं वर्षं शिशिरं सुखदं तथा। आनन्दश्च शिवश्चैव क्षेमकः ध्रुवएव च। मर्य्यादा कारकास्तेषां तथान्ये वर्षपर्वताः। सप्तैव तेषां नामानि शृणुष्व मुनिसत्तम!। गोमेदश्चैव चन्द्रश्च नारदो दु-न्दुभिस्तथा। सोमकः सुमनाः शैलो वैभ्राजश्चैव सप्तमः। वर्षाचलेषु रम्येषु सर्वेष्वेतेषु चानघाः। वसन्ति देवग-न्धर्वसहिताः सततं प्रजाः। तेषु पुण्याः जनपदाश्चिराच्च म्रियते जनः। नाधयो व्याधयो वापि सर्वकालसुखं हि तत्। तेषां नद्यश्च सप्तैव वर्षाणान्तु समुद्रगाः। नामतस्ताः प्रवक्ष्यामि श्रुताः पापं हरन्ति याः। अनुतप्ता शिखा चैव विपापा त्रिदिवा क्रमुः। अमृता सुकृता चैव सप्तैतास्तत्र निम्नगाः। एते शैलास्तथा नद्यः प्र-धानाः कथितास्तव। क्षुद्रनद्यस्तथा शैलास्तत्र सन्ति सह-स्रशः। ताः पिबन्ति सदा हृष्टा नदीर्जनपदास्तु ते। अपसर्पिणी न तेषां वै न चैवोत्सर्पिणी प्रजा। न तत्रास्ति युगावस्था तेषु स्थानेषु सप्तसु। त्रेतायुगसमः कालः सर्वदैव महामुने!" विष्णुपु०। कल्पभेदान्नामभेदः। तदुत्तरं वनश्च चात्रम् प्लाक्षवणम्। प्लक्षस्यादूरदेशादि क नडा० कुक्च्। प्लाक्षकीय तत्समीपादौ त्रि०।

**प्लक्षजाता** स्त्री प्लक्षात् तत्समीपस्थप्रस्रवणात् जाता। सर-स्वत्यां नद्यां भा०आ० १७०अ०। [७६अ०।

**प्लक्षतीर्थ** न०प्लक्षसमीपस्थं तीर्थं शाक०त०। तीर्थभेदे हरिवं०

**प्लक्षप्रस्रवण** न० प्लक्षस्य समीपस्थं प्रस्रवणम्। सरस्वत्युत्-पत्तिस्थाने भा०श० ५०अ०।

**प्लक्षराज** पु० ६त०। सोमतीर्थस्थिते प्लक्षवृक्षे भा०श०४४अ०।

**प्लक्षादि** पु०फले अण्प्रत्ययलुगनिमित्ते शब्दगणे स च गणः पा० ग० उक्तो यथा "प्लक्ष न्यग्रोध अश्वत्थ इङ्गुदी शिग्रु रुरु कक्षतु बृहती"।

**प्लक्षावतरण** न० अवतरत्यस्मात् अव–तृ–अपादाने ल्युट्। प्लक्षः तन्निकटस्थितप्रस्रवणरूपमवतरणम्। सरस्वत्या अवतरणस्थाने प्लक्षप्रस्रवणे भा०व० ८९अ०।

**प्लति** पु० प्लु–बा० डति। ऋषिभेदे ऋ० १०।८४।१७

**प्लव** न०प्लु–अच्। १कैवर्तीमुस्तके २गन्धतृणे मेदि०। प्लुत्वा ३गन्तरि त्रि०। भावे अप्। ४प्लवने (भासा) कर्त्तरि क-रणे वा अप्। ५भेके ६भेलके (भेला) ७मेषे ८श्वपचे ९वानरे १०जलकाके ११कुलके १२प्रवणे १३पर्कटीवृक्षे १४कारण्डवखगे १५शब्दे १६प्रतिगतौ च पु० मेदि०। जातित्वे स्त्रीत्वमपि स्त्रियां ङीष्। १७प्रेरणे १८शत्रौ च पु०शब्दरत्ना०। १९जालभेदे हेमच०२०पलवे (पोलो) मत्स्यधारणयन्त्रभेदे त्रिका०। २१जलकुक्कुटे मिता० २२जलचरपक्षिगणभेदे यथोक्तं भावप्र० "हंससारसकाचाक्षवकक्रौञ्चशरारिकाः। नान्दीमुखी सकादम्बा बलाकाद्याः प्लवाः स्मृताः। प्लवन्ते सलिले यस्मादेते तस्मात् प्लवाः स्मृताः"। एतेषां मांसगुणाः। "प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः। वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः"।

**प्लवक** त्रि० प्लु–बा० अक। १प्लुतगतिकारके २खगधारादौ नर्त्तके त्रिका० ३चण्डाले हला० ४भेके ६प्लक्षे राजनि०

**प्लवग** पु० प्लवन् सन् गच्छति गम–ड नि०। १वानरे २भेके ३सूर्य्यसारथौ मेदि० ४प्लवसंज्ञखगे शब्दर०। ५शिरीष-वृक्षे राजनि०। [भेकानां गतौ स्त्री।

**प्लवगति** पु० प्लवेन गतिरस्य। १भेके शब्दच०। ६त०। प्लवानां

**प्लवङ्ग** पु० प्लवन् सन् गच्छति गम–ड खच् मुम् नि०। १वानरे २मृगे शब्दच०। ३प्लक्षवृक्षे राजनि०। [१वानरे अमरः।

**प्लवङ्गम** पु० प्लवन् सन् गच्छति गम–खच् मुम् नि०। १भेके।

**प्लवन** त्रि० प्लु–ल्यु। १निम्ने प्रवणे क्रमनिम्नतां गन्तरि "प्रागुदक् प्लवनां भूमिं कारयेत् यत्नतो नरः" ति०त० मत्स्यपु०। भावे ल्युट्। जलोपरि गतौ न० (भासा)।

**प्लविक** त्रि० प्लवेन तरति ठन्। प्लवेन तारिणि।

**प्लाक्ष** न० प्लक्षस्य समूहः, तस्य विकारस्तस्य फलं वा अण् न लुप्। १प्लक्षवृक्षफले २तद्विकारे ३तत्समुदाये च।

**प्लायोगि** पु० प्रयोगनाम्नः राज्ञः पुत्रः इञ् वेदे रस्य लः। प्रयोगनाम्नः राज्ञः पुत्रे ऋ० ८।१।३३